॥अथतिथिनिर्णयोत्थारम्भः॥

निर्णयो- ॥१॥

श्रीगणेशायनमः॥हरिःओम्॥स्मृत्यर्थसारंहेमाद्रिंमाधवंनिर्णयामृतं॥
वीक्षनिर्णयसिंधुंचस्मृतिदर्पणमादरात्॥१॥निर्णयोदत्यतःसारमुद्धृ
दारंकरोम्यहं॥राधवोविदुषांप्रीयेनिर्णयोदारनामकः॥२॥तत्रतिथिर्दो
धा॥सदाविद्धाच॥तत्रशुद्धासपूर्णानिर्णयानही॥तिथ्यंतरयुताविद्धा॥
वेधस्तुसायंप्रातश्चिमुहूर्तामकःकेचिदिमुहूर्तौपुनः॥तत्रसोरमानंस
माश्रयेत्॥तिथिर्विशेषवेधउपसातिरिक्तःसयथा॥नागोदादशानाडी
भिर्दिकूपंचदशाभिस्तथाभूतोदादशानाडीभिर्दिषयुक्तरांतिथिं॥स्य
स्यकर्मकालव्यापिनीतिथिर्ग्राह्या॥एकभक्तेमध्याह्नव्यापिनीग्राह्या॥म
ध्याह्नःपंचधाविभक्तदिनतृतीयभागः॥उभयदिनयासमयाप्तौवापूर्वै
वेतिमाधवः॥नक्तव्रतेप्रदोषव्यापिनीग्राह्या॥अस्तानंतरंत्रिमुहूर्तंप्र ॥१॥
दोषः॥द्विमुहूर्तइतिकोचित्॥दिनद्वयेप्रदोषव्याप्तौवापरेव॥शुक्लेप्रतिप

त्परादिव्यापिनीग्राह्या॥तदभावेसायाह्नव्यापिनीग्राह्येतिमाध
वः॥कृष्णाप्रतिपदेवंपतेः॥द्वितीयातुकृष्णापूर्वा॥शुक्लान्यरेतिहेमाद्रिः॥
तृतीयातुरंभातिरिक्तासर्वापरैव॥गौरीव्रतेतुशुद्धामपिपूर्वांयुक्तामुद्ध
तिमात्रामपिपरैवग्राह्येतिमाधवः॥चतुर्थ्यांगणेशव्रतेतिरिक्तासर्वा
परैव॥गणेशव्रतेतत्तिथियुतामध्याह्नव्यापिनीग्राह्या॥अन्यथापरेति
माधवः॥गौरीचतुर्थीव्रतेतुदिनद्वयेमध्याह्नव्याप्तावपिपूर्वैव॥रामकौतु
केनिर्णयसंधौचकृष्णचतुर्थ्यंकगणेशचंद्रोदयगाग्राह्येत्युक्तं॥दिनद्वये
तत्तदभावेवापूर्वैवपंचमीतुकृष्णापूर्वाशुक्लातरेतिहेमाद्रिः॥सर्वा
पिपूर्वैवेतिमाधवः॥नागव्रतेपरायथापूर्वेतिनिर्णयसिंधुः॥षष्ठीस्क
न्दव्रतेतिरिक्तासर्वापरैव॥सप्तमीसर्वापिसर्वमतेपूर्वैव॥अष्टमी

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

तुकृष्णापूर्वा शुक्लैस्तिमाधवः॥ शिवरात्र्युत्सवेकृष्णापक्षेवै॥न
॥२॥ वमीसर्वापिसर्वमतेपूर्वैव॥दर्शमीतुकृष्णापूर्वाशुक्लोत्तरेतिमा
धवः॥कमलाकरस्तुदैवज्ञपिनवमीयुक्तेदर्शाह॥नवमीयुतासम
वे॥औदयिकीयाह्येतिनिर्णयामृतः॥अथैकादशी॥सा द्विधाशुद्धावि
द्धा॥तत्रशुद्धाहिसम्यूनाधिकभेदेनत्रिधा॥दशमविद्धादश्य्
नसमाधिक्यभेदेनप्रत्येकंत्रिधा॥एवंनभेदाः॥विद्धायाअप्येवमे
वमष्टादशभेदाः॥यथा॥शुद्धसमाद्वादशीसमा॥१॥शुद्धसमाह्रा
दश्यूना॥२॥शुद्धसमाद्वादश्यधिका॥३॥शुद्धन्यूनसमद्वादशिका॥४॥ ॥२॥
शुद्धन्यूनन्यूनद्वादशीका॥५॥शुद्धन्यूनाधिकद्वादशीका॥६॥शुद्धा

धिकासमद्वादशिका॥७॥शुद्धाधिकान्यूनद्वादशिका॥८॥शुद्धाधिका
धिकद्वादशिका॥९॥विद्धसमासमद्वादशिका॥१०॥विद्धसमान्यून
द्वादशिका॥११॥विद्धसमाधिकद्वादशिका॥१२॥विद्धन्यूनसमद्वाद
शिका॥१३॥विद्धन्यूनान्यूनद्वादशिका॥१४॥विद्धन्यूनाधिकद्वादशि
का॥१५॥विद्धाधिकासमद्वादशिका॥१६॥विद्धाधिकान्यूनद्वादशि
का॥१७॥विद्धाधिकाधिकद्वादशिका॥१८॥तत्राद्येषुत्रिषुनि
र्णयः॥सूर्योदयात्पूर्वमुहूर्तद्वयाधिकंप्रविश्यैकादशीशुद्धा॥
पञ्चघट्यादूनद्व्यधिकानतरंकलापिदशमीप्रवेशोविद्धा॥विद्धा
सर्वथैवत्याज्यैव॥शुद्धाभेदेषुतृतीयषष्ठसप्तमनवमषष्ठेषुपरेवोपो
ष्याअन्यपूर्वैवेतिमाधवकमलाकरौ॥अथस्मार्तनिर्णयः॥तत्रसू

निर्णयो द्वाद्श्यां दशमीसंयुक्तायां तथा शुद्धा ॥ शुद्धाभेदेषु रुद्रसमादिषट्प
क्षेषु पूर्वैव पौर्णमासीति माधवनिर्णयामृतकमलाकरादिवचनम् ॥ तृतीय
षष्ठपक्षयोः सर्वैरपुनरायात्येतिमाधवः ॥ एतच्च विषयभिन्नि
कमलाकरः ॥ संयुक्तभेदयोर्गृहस्थैः सकामैश्च पूर्वा ॥ यतिवन
स्थविधवाभिरुत्तरा ॥ अशुद्धभेदविद्धयोस्तिथ्योर्निर्णयामृते दर्शे
यंकार्यमिति हेमाद्रिकमलाकरौ नवमभेदेतु सर्वैषां परैव ॥ दर्शो
भेकादश्यौ गृहस्थैः पूर्वा ॥ यतिविधवाभिरुत्तरा ॥ द्वादशीपक्षेस
र्वैषांपरैव ॥ त्रयोदशी माधवनिर्णयामृतमते सर्वैषां पूर्वा ॥ कम
लाकरस्तु मुमुक्षूणां पुत्रवतां च परा ॥ अन्येषां पूर्वैवेति चतुर्दशी ॥ ॥

पक्षेतु पूर्वैव ॥ तत्रापि मुमुक्षूणां परा ॥ अन्येषां पूर्वैवेति मदनरत्ने ॥
पञ्चदशीपक्षे हेमाद्रिमाधवमतेपरा ॥ निर्णयामृतमयनरत्नम
तेपूर्वा ॥ षोडशीपक्षेसर्वेषां पूर्वैवेति कमलाकरः ॥ निर्णयामृत
मतेपरा ॥ माधवमतेगृहस्थैर्यतिविधवाभिश्चनक्तैः पूर्वैवेत्याह्याः ॥
समग्रदर्शपक्षेमोक्षापेक्षयाविद्धापीतिकालेयतिवैधव्यपू
र्वाभिः परा ॥ गृहस्थैस्तुपूर्वैव ॥ गृहस्थैर्नक्तकालव्यापितिकमलाक
रादर्शपक्षेसर्वेषांपरैवेति वैधसंदेहेतिथितत्त्वे प्रतिपदोर्या
परैवेतिकेचित् ॥ तदप्यनादरणीयं परैवेतिकमलाकरः ॥ चैकादश्यां
पित्रोः श्राद्धेसतितल्लक्षणापित्र्यैषमाजिघृक्षितिहेमाद्रि
माधवादयः ॥ द्वादश्यां दा[illegible] अमावास्यातद्दर्शमध्याह्नि

कौक्रियामपकृष्यकृत्वाप्रातरेवपारणंकार्यमितिदेवलः॥संकटेश्राद्धेप्रदोषव्रतादौजलेन पारणंकुर्यादितिच॥द्वादश्याःप्रथमःपादोहरिवासरसंज्ञस्तंवर्जयेत्॥इत्येकादशी॥ ॥द्वादशीपक्षद्वयेपिपूर्ववैव॥त्रयोदशीसर्वमतेशुक्लपूर्वाकृष्णोत्तरा॥त्रयोदशीसर्वमतेकृष्णा पूर्वाशुक्लोत्तरा॥पक्षद्वयेप्युपवासेपरेतिमदनरत्ने॥मासशिवरात्रिव्रतेहेमाद्रिमतेबहु रात्रव्यापिनीग्राह्या॥प्रदोषव्यापिनीतिकेचित्॥साम्येपूर्वा॥निर्णयसिंधौप्रदोषनिशी थोभयव्याप्येवमाघशिवरात्रिर्निर्णयवदित्यलं॥ ॥अमापूर्णेतुलादानपित्रर्देवप्रीत्यर्थो पवासादौपरेग्राह्ये॥श्राद्धेअमासाग्निकैस्त्रिधाविभक्तदिनस्यतृतीयोभागोऽपराह्ण व्यापिनीग्राह्या॥दिनद्वयेतत्सत्वेसर्वापराह्णगाग्राह्या॥दिनद्वयेऽपराह्णाव्याप्त्यभावेत्र तोव्याप्तौचतिथिक्षयेपूर्ववैव॥तिहेमाद्रिः॥दिनद्वयेऽपराह्णव्याप्त्यादौत्रिमुहूर्तीचेत्परा॥ निराग्निकैस्तत्कुतुपकालव्यापिनीग्राह्या॥अपराह्णव्यापिनीसर्वेषांतिथिसाम्येति थिरद्वौचपरा॥तिथिक्षयेपूर्वा॥तिथिसाम्येधिका॥दिनद्वयेऽपराह्णस्पर्शेकुतुपका

लव्यापिनीग्राह्येतिमाधवः॥दिनद्वयेकुतुपकालव्याप्तौपरा॥कुतुपस्तुपंचदशधाविभक्तदिनस्याष्टमोभागइतिस्मृत्यर्थसारादयः॥यागकालस्तुपर्वणश्चतुर्थोभागःप्रतिप दाद्यभागत्रयंच॥तत्रमध्यान्हेतत्पूर्वापरेप्रतिपदोःसंधौतदहर्यागः॥अत्रान्होद्वयविभा गः॥मध्यान्हादूर्ध्वंसंधौपरेन्हियागइतिमाधवः॥हेमाद्रिमतेपरदिनेप्रतिपच्चतुर्थचरणे सतिद्वितीयासुक्षयगतासुपूर्वेन्हियागः॥अन्यथापरस्मिन्प्रातरुदयदिनेयागोनिषिद्धः॥ अपराह्णसंधौचतुर्थचरणेपियागइतिमाधवः॥एतत्पौर्णिमापरमितिकमलाकरः॥संज्ञवा दूर्ध्वंमध्यान्हालाभ्यासंधिःसापौर्णमासीसद्यस्कालविधा॥अमायांविशेषः॥प्रतिपदि सायंद्वितीयायास्त्रिमुहूर्तस्पर्शेचतुर्दश्यामन्वाधाने॥नाजसनेयिनांसंधिदिनेऽन्वाधा नमपरेन्हियागइतिमाधवः॥नेतिकमलाकरः॥तैतिरीयाणांचंद्रदर्शनेयागः॥एवंनिर ग्निकानांस्मार्तस्थालीपाकेपि॥संधिर्निर्णयस्तुमदनपारिजातेउक्तः॥एतदुक्तंभवतीत्यु पक्रम्यसूर्योदयानंतरभाविन्योयाःसर्वप्रतिपत्परिकास्ताएकीकृत्यद्वधाविभज्यार्धं पूर्वदिनेऽर्धंपरदिनेचयोज्यमिति॥कौस्तुभादेतुसंपूर्णाप्रतिपदंचैकीकृत्यप्रतिपदश्च

घटिकार्धेपर्वणियोऽन्यूनेचेन्न्यूनकुत्वासंधिर्निर्णयइति॥पिंडपित्रयज्ञस्तुकाल्यायनानां
यागदिनासूर्वदिने॥आश्वलायनानांत्वेषपर्वणि॥खंडतिथौतुपूर्वदिनेन्वाधानंआद्धंचवि
धायपरेद्युःपर्वतिस्थालीपाकंचकृत्वापरेह्नि पिंडपित्रयज्ञइतिदिक्॥ ॥इत्यमावास्या॥
अथग्रहणनिर्णयः॥तत्रसूर्यग्रहणंयस्मिन्यामेतस्मात्पूर्वयामचतुष्टयेनाश्नीयात्॥चंद्रग्र
हणेतुयाममात्रं॥बालवृद्धातुरार्णांतुग्रहणप्रहरात्पूर्वयाममात्रंनिषिद्धं॥चंद्रग्रस्तोदयेऽपि
वानाश्नीयादितिमाधवः॥ग्रस्तास्तेमुमुक्षुंदृष्ट्वाश्नीयात्॥सूर्यग्रस्तास्तेतूपवासः॥ग्रह
णप्रहरात्प्राक्प्रहरद्वयंहित्वापुत्रवानद्यान्नोपवसेदितिहेमाद्रिः॥पुत्रवानपिनाश्नीयादि
तिमाधवस्तद्युक्तोत्तरं॥यदाकृष्णैकादश्योर्वस्तुनोर्नकिंचिद्दृश्यंप्रकल्पयेन्नैवभुंज्यादिति
नीलकंठः॥ग्रहणांतेग्रहणदिनेचोपवासोमहाफलः॥ग्रस्यमानेस्नानंग्रस्तेहोमः॥मुच्य
मानेदानंमुक्तेस्नानंच॥रजस्वलाप्युद्धृतवारिणास्नायादितिविज्ञानेश्वरः॥अत्रवृद्धि
क्षयाशौचेपिस्नात्वाश्राद्धादिकुर्यादितिमाधवकमलाकरौ॥तद्दिनेप्रत्याब्दिकेसतितद्दास्य
मानान्नेनामेनवाकुर्यात्॥ग्रहणनिमित्तश्राद्धेनैवदर्शश्राद्धसिद्धिः॥ ॥इतिग्रहणनिर्णयः॥

५

अथसंक्रांतिनिर्णयः॥मेषसंक्रमेपराग्घ्रेदद्यानाड्यःपुण्याः।वृषेपूर्वाःषोडश॥मिथुनेपराःषो
डश॥तुलायांपराग्घ्रेदद्यात्॥वृश्चिकेपूर्वाःषोडश॥धनुषिपराःषोडश॥तुलायांपराग्घ्रेदद्यात्॥वृ
श्चिकेपूर्वाःषोडशाः।धनुषिपराःषोडश॥मकरेहेमाद्रिमतेपराश्चत्वारिंशत्॥परेत्वमाधवम
तेविंशतिः॥कुंभेपूर्वाःषोडश॥मीनेपराःषोडश॥दिनसंक्रांतौतुयत्रोत्तरतःपुण्यकालस्तत्रता
वन्मितःपूर्वमोक्षस्तत्रप्रागुक्तः॥तत्रापिप्रातःसंक्रांतौतत्रतावन्मितःपरतउदयानंतरमेवनि
शीथादर्वाक्चेत्तदादिनद्वयंपुण्यं॥यदासूर्यास्तात्पूर्वसमयेकर्कमकरसंक्रांतीस्तस्तदाहे
माद्रिमाधवमतेचपूर्वमेवपुण्यं॥रात्रौप्रदोषेनिशीथेवामकरसंक्रांतौमाधवमतेद्वितीयदि
नमेवपुण्यं॥हेमाद्रिस्मृत्यर्थसारमतेनिशीथात्पूर्वंपिश्वाऽसंक्रांतौदिनेद्वयेक्रमेणपं
चपंचनाड्यःपुण्याः॥निर्णयसिंधौतुप्रदोषेऽर्द्धरात्रेवामकरसंक्रांतौपरदिनेप्रातःपंचना
ड्यःपुण्याः।निशीथानंतरमुदयपर्यंतंकर्कसंक्रांतौदिनांतेपूर्वदिनेपंचनाड्यःपुण्याः॥
एतत्पुण्यातिशयद्योतनार्थमितिविरोधःपरिहृतः॥ ॥इतिसंक्रांतिनिर्णयः॥ ॥अथमा
सक्रमेणविशेषतिथयोनिर्णीयंते॥चैत्रसितप्रतिपदुदयव्यापिनीग्राह्या।द्विनद्वयेत

व्याप्तावप्यमावास्यैवा पूर्वैव॥चैत्रनवरात्रेतु द्वितीयायुतैवग्राह्या॥नित्योत्सवे
त्वभ्यंगः॥अपरान्हव्यापिन्यां॥शुक्लतृतियागौरीव्रतेमुहूर्तमात्रेऽपि
परैवग्राह्या॥इयंमन्वादेरपि॥मन्वादयःसितास्तृतीयाकार्त्तिकाःस्युः॥
कृष्णाऽपराह्णगा इतिहेमाद्रिः॥चैत्रशुक्लनवमी
रामनवम्यपि॥इयंमध्याह्नव्यापिनीग्राह्या॥वृद्ध्यादिनैकादश
शीवद्धेस्पर्शतःपूर्वा॥वेधेवैरूप्यइतिनिर्णयसिंधुः॥
कृच्चतुर्दशीकृतधर्मदमनार्पणादौपूर्वैवसायंकौलव्यापि
नीग्राह्येतिमाधवः॥पूर्वदिनेसायंमुहूर्तवेधाभावेपरेतिकमला
करः॥पौर्णमासितुत्रिमुहूर्तीचेत्परैव॥अन्यथापूर्वा॥इतिचै
त्रः॥वैशाखशुक्लतृतियापूर्वाऽपराह्णव्यापिनीग्राह्या॥दिनद्वये

डाक्टर भाऊ दाजी लाड ओरिएन्टल म्यूजियम
DR BHAU DAJI

तत्र्यासेपरैव॥गौरीव्रतेमुहूर्तमात्रेऽपिपरैव॥इयंयुगादिरपि॥
माघेपञ्चदशीशुक्लाचैत्रेत्रयोदशी॥तृतीयामाधवेशुक्लानभस्य
तेयुगाइयंस्मृतिः॥एताःपूर्वाःकौलाःसायाह्नव्यापिनइति॥मन्वा
दियुगादिश्राद्धेषुतुकौलद्वयव्यापित्रिमुहूर्तापराह्णव्यापिनीग्राह्ये
तिसंग्रहार्थसारः॥दिनद्वयेतत्र्यासेपरैवेतिहेमाद्रिः॥निर्णया
मृतकालादौतुश्राद्धवदपराह्णइत्याहतुः॥तदिदानीतनानै
वंतिं॥इयंपरशुरामजयंतिं॥सामयोर्व्याप्तिनीग्राह्या॥दि
द्वयेतद्व्याप्तावशीतःसमव्याप्तौचपरा॥विशेषव्याप्तौत्वधिकव्या
प्तिमती॥उभयदिनेऽप्यव्याप्तौपरा॥इतिवैशाखःज्येष्ठीपौर्णिमासी

निर्णयोऽयंत्रयोदश्यांवृतेपूर्वविद्धाग्राह्या॥अष्टादशघटिकामितायदाचतुर्दशीत
र॥७॥ दासावित्रीव्रतेपरेतिमाधवः॥कमलाकरोनेतत्समानःपूर्वेत्याह॥
इतिज्येष्ठः॥आषाढशुक्लेकादश्यांद्वादश्यांवाचातुर्मास्यव्रतारंभः
कार्यः॥शुक्लद्वादश्यांअनुराधायाःगतेष्ययोगेनत्रिभागेऽतेप्रथमभा
गयोगरहितायाःपरेणकार्यंअस्यामेवविष्णोःशयानोत्सवःकार्यः॥
आषाढपौर्णिमाकोकिलाव्रतेसायाह्नव्यापिनीग्राह्यापुजायांत्रिमुहू
र्तचेत्परैव॥इत्याषाढःशुक्लतृतीयामारभ्यमासमात्रंकुमारीभि
र्गौरीपुज्या॥सातृतीयात्रिमुहूर्तचेत्सरेतिसमकोलुके॥श्रावेशुक्ल ण

~~वित्रीव्रतेपूर्वविद्धाग्राह्या॥अष्टादशघटिकामितायदाचतुर्दशी~~
~~र्दासावित्रीव्रतेपरे~~चतुर्थ्यामिवाहितेःकुमारैःकुमारीभिश्चै
कविंशतिग्रंथियुतःसूत्ररूपोगणेशःपूज्यःइतिसांग्रहायिकाः॥
इयंचतुर्थ्यमध्याह्नव्यापिनीग्राह्या॥तदभावेत्रिमुहूर्तचेत्परा॥
नागचतुर्थ्यमध्याह्नव्यापिन्येवोपोष्या॥दिनद्वयेनथातैर्भावेवा तद
परैव॥पंचमीनागपूजादौत्रिमुहूर्तचेत्सरा॥अन्यथापूर्वैवलव
माषाढकार्तिकेमार्गशीर्षपंचम्यापि॥श्रावणशुक्लचतुर्दशी
कुलधर्मपवित्रार्पणादौपूर्वेवि॥सायंकाल्यापिनीग्राह्यनिमा

धवः ।। विशेषश्चैत्रशुक्लचतुर्दशीवत् ।। अत्रश्रवणर्क्षेउपाकर्मकुर्या
त् ।। दिनद्वयेऋक्षयोगेसतिधनिष्ठायुक्तःश्रवणोग्राह्यः । उत्तराषाढ़ा
युक्तोनिषिद्धः ।। पूर्वेद्युरुत्तराषाढ़ायोगेपरेद्युरपिश्रवणाभावेघ
टिकाद्वयन्यूनेचरुत्सर्गयुक्तपंचम्यादौकार्यं । तथैवसंक्रांतिग्रहणगु
रुशुक्रास्तादौनूतनानामेवपंचम्यादौअन्येषांतदेवश्रवणादौ ।।
तत्रापिरात्रौत्तराषाढ़ाश्रवणादौश्रवणयुतएवकार्यं ।। प्राचीनैःतैत्ति
रीयाउदयव्यापिन्यांपौर्णमास्यांकुर्युःकात्यायनानांतुदिनद्वयेपू
र्वत्रिभागादिकदेशास्यशेषायांपूर्वेनैतिरुमाह्निः ।। निर्णयामृतस्तु
यजुःशाखिनामौदयिक्यपरेद्युरुक्तवान्नूनंरामकौतुकेतुपूर्वांग्राह्य

स्तुक्तं ।। नूतनब्रह्मचारिणामत्रवृद्धिश्राद्धंतुकेवृत्तिकृता ।। ब्रह्मचारिष्वन्येषां
वायथाधिकारंचपनमूह्यमत्र ।। श्रावणीपौर्णमासीपवित्रार्पणंकुलधर्मा
दौपूर्वैव ।। अस्यामभ्यंगोनित्यः ।। अस्यामेवभद्रारहितायांरक्षाबंधन
कार्यं ।। श्रवणाकर्मप्यस्तमयेयोगिनीग्राह्या ।। स्वदेशेपर्वणिवाकुर्यात्
।। कृष्णतृतीयाकल्लोलीसापरा ।। चतुर्थीसायान्व्यापिनीदिनद्वयेत
त्सत्वेपूर्वाकृष्णचतुर्थीसकृच्चतुर्थीगणेशप्रादुर्भावरिनसेतु ।। सा चेद्दो
र्व्यापिनीग्राह्या ।। दिनद्वयेचेद्दयेसत्वेपूर्वैव ।। असत्वेकर्मोपक्रमेव्याप्ति
सत्वापरैवेतिमाधवकल्पतरौ ।। कृष्णसप्तमीशीतकालपूर्वाग्रेते ।। श्रावण
कृष्णाष्टम्यर्धरात्रव्यापिनीग्राह्या ।। उभयेयुश्चिशीथयोगेनरभावेशशयुक्ता
सोहिणीयोगेनेयंचतुर्धा ।। पूर्वेद्युरर्धनिशीथरोहिणीयुतापूर्वा ।। परेद्युरर्धनिशीथे
उभयद्युश्चेत्परा ।। पूर्वेद्युरर्धनिशीथेऽष्टमीपरेद्युर्निशीथेऽष्टमीरोहिणीयुताचेदपि

परेवा॥यदा तुपूर्वयुर्नि शीथेऽमीपरेद्युर्नि शीथेरोहिणी तदा माधवमवेयरा॥
हेमाद्रिमतेपूर्वा कृतत्वविवेचनादयापि नव्याःस्वामवेद्धिनी तदाकमला
करस्वरूपवा सदृयमवदत्॥यदा तुपूर्वेद्युर्नि शीथेरोहिणी परेद्युरमीनी शीथे
तदापरा॥उभयदिनेनि शीथेऽमीरोहिण्येर्नि शीथा सभवसर्वमवपरेवा॥
इयंबुधस्तोमयुतानिप्रशस्तेतिमाधवः॥सभवतीभ्यर्च्यहेमारण्यकुर्या
दुसवंतियायामत्रयाधिक्येतिथिमध्यएव॥अत्ररात्रावपिपारणंकुर्यात्॥
यदारात्रौतुसाधेप्रहरोत्तरनक्षत्रंतत्सदालुपवासएव॥अमायोक्तशेष
हणेकुर्यादितिः॥इतिश्रावणः॥भाद्रपदशुक्लतृतीयाहरितालिकाव्रते
सपूर्णामिपूर्वांवाद्धमुहूर्तमात्रापरेवा॥याज्ञवल्क्यमाधवः॥भाद्रशुक्ल
चथुर्थीमध्याह्नव्यापिनीग्राह्या॥तामिश्रोक्तव्यापिनीग्राह्या॥मध्यानस्पृग्धाविभस्मा

क्तीत्यभागायद्यधिकाहयं॥दिनद्वयेतथात्वेपूर्वा॥दिनद्वयेतदभा
वेपरेवेतिमाधवः॥सिद्धिविनायकेव्रतेप्यत्रनिर्णयोबोध्यः॥भाद्रप
दशुक्लपंचमीऋषिपंचमीइयंमध्याह्नव्यापिनीग्राह्यमाधवीयेहारी
तः॥दिनद्वयेतथात्वेपरेविद्धामाद्रिः॥दिनद्वयेमध्याह्नव्याप्तावव्या
प्तौवापूर्वेवेमाधवः॥ऋषिपंचम्यांपूजाविधानाद्रात्रियोगिनीव्याप्ति
रामकौतुके॥भाद्रपदशुक्लसप्तम्यांमुक्ताभरणव्रतं॥तत्रसा पू
र्वविद्धाषष्ठ्युन्मीलितिवचनात्॥भाद्रपदशुक्लाष्टमीदूर्वाव्याप्तौ
तुपूर्वेवइयमवजेत्राजुजनेजेत्रायोगवशेनपूर्वपरावाग्राह्या
दिनद्वयेपराप्रतिपद्विद्धजेत्राव्रतमपरेह्यामेवकार्यी॥परंतुदा

क्षिणायां कृष्ण एव पूज्य इति।अत्र भानुवाराष्टमीज्येष्ठर्क्षयोगो
ति प्रशस्त इति माधवः॥भाद्रपदशुक्लद्वादश्यां श्रवणमध्य पा
योगरहितायां पारणं कार्यं॥एकादश्याः श्रवणयुतद्वादश्यो
गो विष्णुरेवलायोग इति हेमाद्रिः॥निर्णयामृतमस्तु श्रवणसं
कादशीद्वादशीयोग एवनान्यथेति निशीथानंतरमल्पोदयावधि
कलामात्रमपि विद्धैभवति तदापूर्वैव॥उदयव्यापिनी
याह्येति स्मृत्यर्थसारः॥दिनद्वयेउदययोगे पूर्वा॥यदैकादश्यां
मेवश्रवणोनद्वादश्यांतदापिपूर्वैव॥यदा द्वादश्येवक्रमेणयु
तातदापरा॥कर्मलोकरस्तूपवासदयमवदत्॥हेमा

॥११॥

द्रिस्तुपूर्वामेकादशीत्यत्रद्वादश्येवोपोष्येत्याह॥भाद्रपदशुक्लचतु
र्दशीमनंतव्रतमिमुहूर्तप्योरयिकीमाह्येति माधवः॥यदिकामावा
प्योरयिकीमाह्येतिनिर्णयामृतः॥दिनद्वयेतथालेपूर्वा॥भाद्रपदपौ
र्णिमास्यांप्रपितामहप्रपितामहीमुद्दिश्यनांदीमुखसंज्ञंश्राद्धक
र्मी॥अत्रमातामहानांतुक्रतावंतं॥अथापरपक्षः॥तत्रापिपूर्वःपक्षः
कालः॥पंचम्यादिषुप्रशस्तः॥ततोविद्धाम्यादिः॥तत्रापिमघात्रयो
दशीद्विद्धस्यसत्वमहालयः॥तत्रप्रतिपदादिद्धांतपक्षेनंदादि
कंवर्जयेदाद्धाह्नव्याप्तितिथिः॥नभस्यस्यापरेपक्षेश्राद्धंकुर्यात्॥

MUMBAI DR. BHAU DAJI

दिनेनेत्यनंतरादिवर्ज्यंस्यान्नेवर्जयेच्चतुर्दशीति॥यतुप्रतिपत्प्रभृतितिथ
कांवर्जयित्वाचतुर्दशीमित्यादावल्क्यवचनंमासांतरेसावकाशत
याव्यवहर्तव्यंमाधववचनादितिनिर्णयसिंधुः॥तथापिचतुर्दश्यामप
पिंडकंयुक्तं॥कन्यागतेसवितरिदिनानिदर्शेचत्रयोदश॥यान्याहानिषो
डशा॥सप्तम्येपंचदशीत्येकः॥कन्यः॥अथयुक्शुक्लप्रतिपदासहे
तिद्वितीयः॥हेमाद्रौपूर्वयापौर्णमास्यासहेतितृतीयः॥अत्रपक्ष
द्वयं॥भिन्नानामेवकर्मणांप्रतिदिनंभिन्नाएवप्रयोगाःप्रयोगइति
एकःपक्षः॥एकत्रैवश्राद्धंप्रतिदिनमावर्ततेइत्यपरः॥अत्रेतिप्र ११॥
तिदिनंदक्षिणादेया॥उत्तरस्मिंस्तुसमाप्तिदिनेदक्षिणायाःप्रयोगो

गत्वात्॥ब्राह्मस्तुयोतएवदेशोपिसएवेत्यादिविवेचनीयं॥दरिद्रेण
तुएकत्रयस्मन्नेकस्मिंश्चिदिनेकार्यमितिकेचिदाहुस्तेनिर्मूलं॥आ
षाढ्याःपंचमपक्षस्यपंचमीमारभ्यानंतरंपंचपंचमीर्यितासुतिथिषुम
ध्येअनिषिद्धाभ्यांतिथौकर्तव्यं॥अशक्त्यादिनात्रयाकरणेतुया
वत्कन्यांगतःसूर्यस्तावद्देयं॥तत्रापिकारणेयावद्भिरेकदर्शिना
त्॥सएवमाहातपःयेचवर्ज्यकालमाहुर्गगः॥नंदायांभागवदिनत्रयो
दश्यांत्रिजन्मसु॥एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात्॥त्रिज
न्मनीतिजन्मतीनचमेकोनविंशइत्येके॥जन्मनक्षत्रात्पूर्वांतरमवाप्ते

जन्मेतिशेषनक्तः॥तथासूतिकारोहिणिरवतीमघासुत्रयोदश्यांच
तुर्दश्यांचनिषिद्धं॥अस्यापवादः॥स्मर्यते॥यातिथिर्यस्यमासस्य
मृताहेतुभवेत्तिथौ॥सातिथिःपितृपक्षस्यपूजनीयाप्रयत्नतः॥ति
थिछेदेनकर्तव्योविनाशाचयदुच्यतेनागरखंडोक्तेः॥तत्रापिच
तुर्दशीवर्जा॥वर्जइत्याचतुर्दशीमितियाज्ञवल्क्यवचनात्॥तथा॥
उनमापातेभरिण्यांचद्वादश्यांपक्षयोर्द्वयोः॥इतिपाठः॥नति
थिंनचनक्षत्रंवारंचनविचारयेत्॥इतिहेमाद्रिः॥एतत्पक्षेनवम्यां
जीवपित्रुत्केणगर्भिणीपतिनापिमातुःश्राद्धंसपिंडकंमेवकर्त

१२

व्यं॥तत्रविप्रैःसहसुवासिन्यपिभोज्या॥तत्तन्मरणोत्तरमपियावज्जी
वकर्तव्यमेव॥नेदमन्वष्टकाभिन्नमितिनिर्णयसिंधौ॥संन्यासिनांद्वा
दश्यांश्राद्धंकर्तव्यं॥विधवापापिचतुर्दश्यंस्वयंब्राह्मणद्वारावकुर्यात्॥
निषिद्धेपिमृतेहंतितत्तर्पणंकुर्यादेव॥मघात्रयोदश्यांतुसर्वान्पि
तॄन्यजेत्॥इदंश्राद्धमपिंडकमेवकार्यं॥अपमृत्युहतानामेवंच
तुर्दश्यांविहितं॥तत्रचतुर्दश्यांशस्त्राद्दिहतानामेवेतिचाक्यार्थः॥
एवंचशस्त्राद्दिहतानांतत्तत्तिथौदिनांतरेपिसन्मासहालयेश्राद्धं
कर्तव्यं॥चतुर्दश्यामकोदिष्टमेवसदैवं॥यत्रपित्रादिमध्येकोचि

दौ शस्यारिहतौ तेनद्वयोरपि चतुर्दश्यामेकोदृष्टोयस्यापिशास्त्रेदृत्र
योस्स्तोपिशस्यार्द्धदिहतास्तेनपार्वणमेवकर्तव्यमितिचंद्रिका
कारादयः कहेमाद्रिप्रभृतयः॥माधवस्तुदेवस्वामिमतात्रयाणामप्येको
दिष्टत्रयमवदत्॥चतुर्दश्यांकथंचिद्विद्धेतुदिनांतरेपार्वणमेवकुर्यात्॥इति
भाद्रपदः॥अथाश्विनः॥तत्रयुक्प्रतिपन्मातामहश्राद्धेअपराह्णव्यापिन्येवग्रा
ह्या॥संगवव्यापिलेतुच्छं॥इदंश्राद्धंजीवत्पितृकस्यपिंडरहितंयुक्तमितिप्रतिभा
ति॥अत्रैवनवरात्रारंभःकार्यः॥तत्रोदयेद्विमुहूर्तामुहूर्तमात्रापिपरैव॥अ
मायुक्तानिषिद्धा॥उभयदिनेउदयव्यापिलेपूर्वापरदिनेप्रतिपदोत्यंतासंप
वेअमायुक्तापिपूर्वा॥प्रतिपदःपूर्वाःषोडशनाड्योनिषिद्धाः॥अत्रचित्रावैध १३

त्यादिनिषेधाश्चत्याइतिनीलकंठःक्वचित्समूल्यसभ
वेयाज्यावा॥असंभवेतेषांप्रथमांत्रिवर्ज्याः॥विद्धा॥मुहूर्तमा
त्राधिकासत्रिदोषयुतापिद्वितीयायुतोवयाह्या॥कृत्तिकास्थानंपेतुदिवैवरात्रौ॥इदमारभ्यंमृतसूतकेपिकार्यं॥अ
नारब्धेपिपूजायन्येनकारयेत्॥अपूजारंभस्तुनभवत्येव॥मा
धवनिर्णयामृतयोरपिसामान्यनिर्णयेचतुर्थ्युतामध्याह्न
व्यापिनीग्राह्येतुकर्तोअत्रैवमूलायपादेपुस्तकेपूजनं॥शुक्ल
पक्षेवैवविसर्जनं॥अत्रनराजाशौकुसलप्यादित्रिरात्रमा

कुर्यादितिहेमाद्रिः॥तत्रसप्तम्यामुदयेघटिकामात्रेचेत्पूर्वा॥अ
न्यथापूर्वेतिनिर्णयसिंधुदुर्गोत्सवादयोन्येनिबंधाश्च॥युग्मवाक्यं
नात्रनियामकं॥अथनवमीकृष्णाघटिकामात्रापौर्णमासीशु
क्लाघटिकामात्रापिसप्तमीविद्धानिषिद्धा॥परदिनेऽष्टम्यभावेसप्त
मीयुतापिग्राह्या॥पुत्रवतैकरात्रपक्षेऽष्टम्यामुपवासोनकार्यः॥
नवम्यपेताष्टमीग्राह्या॥अष्टमीनवमीयुक्तानवमीचाष्टमी
युतेतियुग्मवाक्यात्॥इयंसायंत्रिमुहूर्तव्यापिनिषिद्ध
पिबलिपूजनपरा॥हेमाद्रिस्तुनवम्यामेवकार्यां॥आचारा

संधौकुर्वंति॥पुत्रवतैकरात्रपक्षेनवम्यामुपोषणंकार्यं॥पारणं
नवम्यामेवकार्यमितिनियमयदीपः॥तत्तुछंमिति॥कमला
करःनीलकंठो॥तत्तोहाभिसारव्रतकल्पविषयकमि
तिकमलाकरः॥दशम्यामेवपारणंकार्यंइतिहेमाद्रिः॥
कमलाकरनीलकंठादयः॥पारणाहेमृतसूतकजात
सूतकादिप्राप्तौहेमाद्रिब्राह्मणद्वाराकरायित्वापार
णंकुर्यादेव॥सूतेकांतेब्राह्मणभोजनंदक्षिणादानादि

कार्यो साधवा विधवा स्त्रीभिरपि रज्जोदर्शनमध्ये
पारणं कार्यमिति ॥ विजयादशमी प्रदोषव्यापिनी
ग्राह्या ॥ दिनद्वयेतथात्वेपरा ॥ दिनद्वयप्रदोषव्या
पित्वेपूर्वा ॥ परत्र दिनेपरा प्रदोषव्यापिनी ग्रा
ह्या ॥ कौमुदीमहोत्सवेत्वनुपरेव ॥

DR BHAU DAJI LIBRARY

अश्विनकृष्णचतुर्दशीनरकचतुर्दशी ॥ तत्राभ्यंगेचंद्रोदयव्यापिनीग्राह्या दिनद्वयेत
थाचेतरभावेवारुणोदयगाग्राह्या ॥ दिनद्वयेरुणोदयव्याप्तौतदापूर्वाग्रा [illegible] य
युरुणोदयव्याप्यभावेचतुर्दशी हासंपुर्वेद्युःप्रवेशयत्रयोदशीमध्यएवाभ्यंगक
र्यादितिदिवोदासः ॥ तथात्रयोदशीयदाप्रातःक्षयंयातिचतुर्दशीरात्रिशेषेचभावा
स्यातदाभ्यंगेत्रयोदशीतीचदीपकाशातेश्च ॥ अत्रमृतजीवत्पितृकैर्यमदीपदा
र्णंकर्तव्यं ॥ तत्रापसव्येनसव्येनवा ॥ अश्विन्यमायांप्रातरभ्यंगंकुर्यात् ॥ प्रदो
षेदीपंदद्यात् ॥ इत्याश्विनः ॥ ॥ कार्तिकशुक्लप्रतिपदितिपुंडनेषुदीविद्धाग्राह्या
गोक्रीडादौतुसायाह्नव्यापिनीग्राह्या ॥ दिनद्वयेतथैवेपरा ॥ दिनद्वयेतरभावेपू
र्वा ॥ चंद्रोदयविधेयत्रचंद्रोदयेसातदग्राह्या ॥ नारिभिर्नीराजनमंगलमा

लिकेतुघटिकामात्रायामपिद्वितीयायुतप्रतिपद्दिनेमुहूर्तमात्रयापि
विद्धानिषिद्धा॥प्रतिपद्दितैलाभ्यंगोनिषिद्धः॥द्यूतक्रीडाचंद्रकार्तिकशुक्ल
यायमद्वितीयासाप्रतिपद्युतापिग्राह्येतिनिर्णयामृते॥मध्याह्नव्यापिनी
द्यौतिहेमाद्रिः॥उभयद्युर्मध्याह्नव्याप्तौवापराह्णव्यापिनिग्राह्येतिराम
कौतुकेनीलकंठौ॥अत्यंभिन्नीहस्तादिभोक्तव्येनेतरत्र॥भाजिन्यस्ति
हितेअभावेचकल्पितभगिनीहस्तादिभोक्तव्यमितिहेमाद्रिः॥कार्तिकस्य
कृष्णेषुमात्रभीष्मपंचकंकुर्यात्॥अत्रेदंद्वादश्यांस्नित्वेदंतच्चरणयोगरूपंता
यांपारणंकार्यं॥अत्रैवसायंदेवंस्थापनमहोत्सवःकार्यमितिहेमाद्रिः॥शुक्ल १८

चतुर्दश्यांवैकुंठाख्या॥सानिशिथव्योपिनिग्राह्या॥दिन
द्वयेनिशीथव्याप्तौप्रदोषनिशीथोभयव्याप्तिन्येवा॥वि
श्वेश्वरप्रतिष्ठादिनत्वाद्दिनत्वादियंचतुर्दशीद्वयमरु
णोदयव्यापिनीग्राह्या॥अत्रैवकार्तिकव्रतोद्यापनंकर्त
व्यं॥चतुर्दश्यां॥पौर्णमास्यांमिथुनब्राह्मणभोजनंमहादा
नादिकर्तव्यं॥तथात्रपौर्णिमात्रिपुरोत्सवेसायान्व्या

नीग्राह्या॥प्रदोषव्यापिनीवा॥कार्तिककृष्णाष्टमीसावद्ध
रात्रव्यापिनीग्राह्या॥दिनद्वयेरात्रौव्याप्तौउत्तरैव॥इतिका
र्तिकः॥मार्गशीर्षेपंचमीनागपूजनेत्रिमुहूर्ताचेत्परा॥
अन्यथापूर्वैव॥अत्रैवसुकृष्णषष्ठीचंपाख्याद्वयमुत्तरा॥
रात्तताराविद्धायोगवशेनपूर्वापरावाग्राह्या॥पौर्णमास्य
त्रप्रत्यवरोहणेअस्तमयगामिनीग्राह्या॥इतिमार्गशीर्षः॥

पौषशुक्लचतुर्दशीकुलधर्मादौरात्रिव्यापिनीग्राह्या॥पौर्णिमात्रिमुहूर्तौचेत्परा॥अ
तादौकुलधर्मादौपूर्वैव॥इतिपौषः॥माघशुक्लसप्तमीरथसप्तमी॥सौरुणोदयव्या
पिनीग्राह्या॥दिनद्वयेतव्याप्तावव्याप्तौवापूर्वैव॥अत्रैवाष्टम्यांभीष्मतर्पणमुक्तं॥
तत्तुजीवत्पितृकेणयज्ञोपवीतिनैवकार्यं॥पुत्रकामस्तुश्राद्धंकुर्यात्॥माघशु
क्लाष्टम्यामष्काश्राद्धमपराह्णगायां॥तदनुरोधेनसप्तमीनवम्यो॥पौर्णिमारा
कावुत्तरा॥माघकृष्णचतुर्दशीशिवरात्रिः॥तत्रप्रदोषव्यापिलंनिशीथव्यापि
लंचप्रयोजकं॥निशीथश्चद्वितीययामांततृतीययामादिमध्यवर्तिघटीद्वय
मितिमाधवः॥अस्तानंतरंत्रिमुहूर्तःप्रदोषः॥चतुर्नाड्यात्मकइतिनिर्णयामृतः॥
एकेद्युरेवोभयव्याप्तौपूर्वैव॥उभयेद्युर्निशीथव्याप्तौएवेतिहेमाद्रिमदनरत्नौ
॥परैवेतिमाधवनिर्णयामृतौ॥परेद्युरर्धरात्रैकदेशव्याप्तौपरेद्युःसंपूर्णतद्

प्तोपूर्वैव॥ पूर्वेद्युर्निशीथव्याप्तोपरेद्युः प्रदोषव्याप्तोपूर्वैव॥ परेतिनिर्णयामृतः॥ य
दातुपूर्वेद्युर्निशीथानंतरंप्रवृत्तापरेद्युर्वृद्धिरात्रातदाप्रदोषव्यापित्वात्परा॥ दिनद्व
येप्रदोषव्याप्तावव्याप्तौचपूर्वैव॥ निर्णयामृतस्त्वपरेत्याह॥ पारणं चतुर्दशीमध्ए
वकार्यं॥ यामत्रयाधिक्येतुसुतरांतिथिमध्एव॥ इतिमाधवः॥ अथफाल्गुनः॥ फाल्गु
नपौर्णिमाहोलिकापूजार्थंसायान्व्यापिनीग्राह्या॥ प्रदोषव्यापिनीवा॥ सर्वविद्धा॥
दिनद्वयेप्रदोषव्याप्तौपरैव॥ तदभावेपिपरेतिनिर्णयामृतः॥ पूर्वदिनेभद्रायोःसत्वा
त्॥ अन्येतुभद्रामुखमात्रंत्यक्त्वापूर्वदिनएवहोलिकाकार्येत्याहुः॥ वस्तुत
स्तुपूर्वेद्युःसंपूर्णरात्रौभद्रारहितःकालोनप्राप्यतेपरेद्युश्चपौर्णिमाभागस्त
दामुखमात्रंत्यक्त्वाभद्रापुच्छेहोलिकाकार्येतिसर्ववचनानामाशयः॥ नील
कंठाशयोप्येवं॥ यदातुरात्रौसार्धप्रहरोत्तरंहोलिकातदातुतद्दिनेभद्रारात्रौदी

पसमयेस्नात्वाहोलिकांसंपूज्यप्रातःसुवासिन्यादिभोजयेदितिकृत्यतत्त्वात्॥ यदा
तुसंपूर्णपूर्वरात्रिभद्रयाव्याप्ताउत्तरदिनेप्रदोषेचेच्चंद्रग्रहणंतदाग्रहणस्नानोत्त
रमेवहोलींपूजयेत्॥ नतुपूर्वेद्युर्विद्धांपुंडेतिकमलाकरनीलकंठाद्वाहुः
॥ फाल्गुनकृष्णप्रतिपदिश्वपचंस्पृष्ट्वास्नायादितिनिर्णयसिंधुः॥ तद्दिनेप्रातःहो
लिकाभस्मिंतद्विभूतिंचवंदेत्॥ तथाचूतकुसुमप्राशनंचकुर्यात्॥ इतिफाल्गुनः॥
अथचैत्रकृष्णाष्टम्यांजानक्याउत्पत्तिः॥ छ॥ इतिनिर्णयोद्वारेविशेषतिथि
निर्णयः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतितिथिनिर्णयोत्थारसमाप्तः॥

DR. BHAU DAJI
डाक्टर भाऊदाजीलाडसंस्कृतसंग्रहालयस्मारकम्
MEMORIAL